# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (७)

०६.०९.२०११

# पुनरावर्तनम्

- नकारान्तः पुंलिङ्गः ‘राजन्’ शब्दः ।
- असम्बुद्धौ सर्वनामस्थाने उपधादीर्घः । सौ नलोपः ।
- शसादिषु अजादौ ‘अल्लोपोऽनः’ इति अकारलोपः । नकारस्य श्चुत्वम् ।
- शसादिषु हलादौ नलोपः ।
- ङौ ‘विभाषा ङिश्योः’ इति वा अल्लोपः ।

- नकारान्तः पुंलिङ्गः 'प्रतिदिवन्' शब्दः ।
- प्रतिदीव्यतीति प्रतिदिवा, प्रतिवानौ, प्रतिदिवानः ।
- प्रति-उपसर्गपूर्वकात् दिव्-धातोः कनिन्-प्रत्यये निष्पन्नं 'प्रतिदिवन्' इति नकारान्तं प्रातिपदिकम् ।
- तस्य सर्वनामस्थाने राजवद्रूपाणि ।
- अस्य भविषये अल्लोपे कृते,
- प्रतिदिवन् (शस्) अस्
- प्रतिदिव् न् अस् ('अल्लोपोऽनः')

# ३५४. हलि च (८.२.७७)

- पदद्वयम् । हलि, च ।
- ‘र्वोरुपधाया दीर्घ इकः’ (८.२.७६) इति पूर्णम् अनुवर्तते । ‘सिपि धातो रुर्वा’ (८.२.७४) इत्यतः ‘धातोः’ इति च ।
- रेफवान्तस्य धातोः उपधायाः इकः दीर्घः स्याद् हलि ।
- प्रतिदिव्  न्  अस्
- प्रतिदीव्  न्  अस्  (‘हलि च’ इति उपधादीर्घः)
- प्रतिदीव्नः

- न च अल्लोपस्य स्थानिवत्त्वम् । दीर्घविधौ तन्निषेधात् ।
- ‘न पदान्त-द्विर्वचन-वरे-यलोप-स्वर-सवर्ण-अनुस्वार-दीर्घ-जश्-चर्विधिषु’ (१.१.५८)

- बहिरङ्गपरिभाषा तु उक्तन्यायेन न प्रवर्तते ।
- यथोद्देशपक्षे षाष्ठीम् अन्तरङ्गपरिभाषां प्रति असिद्धकाण्डे विद्यमानस्य 'हलि च' इति सूत्रस्य असिद्धत्वात् अन्तरङ्ग-बहिरङ्गनिर्णयो न भवति ।
- प्रतिदीव्नः, प्रतिदीव्ना इत्यादि ।

# नकारान्तः पुंलिङ्गः प्रतिदिवन्-शब्दः

असम्बुद्धौ सर्वनामस्थाने परे उपधादीर्घः ।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | प्रतिदिवा | प्रतिदिवानौ | प्रतिदिवानः |
| स | हे प्रतिदिवन् | हे प्रतिदिवानौ | हे प्रतिदिवानः |
| | प्रतिदिवानम् | प्रतिदिवानौ | प्रतिदीव्नः |
| तृतीयाविभक्तिः | प्रतिदीव्ना | प्रतिदिवभ्याम् | प्रतिदिवभिः |
| | प्रतिदीव्ने | प्रतिदिवभ्याम् | प्रतिदिवभ्यः |
| | प्रतिदीव्नः | प्रतिदिवभ्याम् | प्रतिदिवभ्यः |
| | प्रतिदीव्नः | प्रतिदीव्नोः | प्रतिदीव्नाम् |
| | प्रतिदीव्नि / प्रतिदिवनि | | |

सम्बुद्धौ ‘न ङिसम्बुद्ध्योः’ इति निषेधान्न नलोपः

शस्प्रभृतिषु अजादिषु अल्लोपे कृते ‘हलि च’ इति उपधादीर्घः

शस्प्रभृतिषु हलादिषु ‘नलोपः प्रातिपदिकान्तस्य’ ।

- नकारान्तः पुंलिङ्गः 'यज्वन्' शब्दः ।
- सर्वनामस्थानेषु राजवद्रूपाणि ।
- यज्वा, यज्वानौ यज्वानः ।
- यज्वानौ, यज्वानम् ।

- यज्वन् (शस्) अस्
  - 'अल्लोपोऽनः' इति अल्लोपे प्राप्ते,

# ३५५. न संयोगाद्वमन्तात् (६.४.१३७)

- पदत्रयम् । न, संयोगात्, वमन्तात् ।
- 'अल्लोपोऽनः' (६.४.१३७) इत्यनुवर्तते ।
- वकार-मकारान्त-संयोगात् परस्य अनः अकारस्य लोपः न स्यात् ।

- यज्वन् अस्
  - य ज्-व् अन् अस् - वकारान्तात् संयोगात् परः अन् ।
  - अतः अल्लोपो न ।
- यज्वनर् ('ससजुषो रुः' - ८.२.६६)
- यज्वनः ('खरवसानयोर्विसर्जनीयः' - ८.३.१५)
- यज्वना, यज्वभ्याम् इत्यादि ।

# नकारान्तः पुंलिङ्गः यज्वन्-शब्दः

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमाविभक्तिः | यज्वा | यज्वानौ | यज्वानः |
| सम्बोधनप्रथमाविभक्तिः | हे यज्वन् | हे यज्वानौ | हे यज्वानः |
| द्वितीयाविभक्तिः | यज्वानम् | यज्वानौ | यज्वनः |
| तृतीयाविभक्तिः | यज्वना | यज्वभ्याम् | यज्वभिः |
| | यज्वने | यज्वभ्याम् | यज्वभ्यः |
| | यज्वनः | यज्वभ्याम् | यज्वभ्यः |
| | यज्वनः | यज्वनोः | यज्वनाम् |
| | यज्वनि | यज्वनोः | यज्वसु |

शस्प्रभृतिषु अजादिषु 'न संयोगाद्वमन्तात्' इति अल्लोपनिषेधः

- नकारान्तः पुंलिङ्गः 'ब्रह्मन्' शव्दः ।
- ब्र ह्-म् अन्
- मकारान्तसंयोगात् परः अन् । तस्मात् 'न संयोगाद्वमन्तात्' इति अल्लोपनिषेधः ।
- ब्रह्मणः ।
- ब्रह्मणा, ब्रह्मभ्याम् इत्यादि ।

# नकारान्तः पुंलिङ्गः ब्रह्मन्-शब्दः

‘अट्कुप्वाङ्नुम्व्यवायेऽपि’ इति णत्वम् ।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमाविभक्तिः | ब्रह्मा | ब्रह्माणौ | ब्रह्माणः |
| सम्बोधनप्रथमाविभक्तिः | हे ब्रह्मन् | हे ब्रह्माणौ | हे ब्रह्माणः |
| द्वितीयाविभक्तिः | ब्रह्माणम् | ब्रह्माणौ | ब्रह्मणः |
| तृतीयाविभक्तिः | ब्रह्मणा | ब्रह्मभ्याम् | ब्रह्मभिः |
| | ब्रह्मणे | ब्रह्मभ्याम् | ब्रह्मभ्यः |
| | ब्रह्मणः | ब्रह्मभ्याम् | ब्रह्मभ्यः |
| | ब्रह्मणः | ब्रह्मणोः | ब्रह्मणाम् |
| | ब्रह्मणि | ब्रह्मणोः | ब्रह्मसु |

शस्प्रभृतिषु अजादिषु ‘न संयोगाद्वमन्तात्’ इति अल्लोपनिषेधः

- नकारान्तः पुंलिङ्गः 'वृत्रहन्' शब्दः ।
- वृत्रं हतवान् इत्यर्थे 'हन हिंसागत्योः' धातोः 'ब्रह्मभ्रूणवृत्रेषु क्विप्' इति क्विप् प्रत्ययः ।
- वृत्रहन् (सुँ) स्
  - 'सर्वनामस्थाने चासम्बुद्धौ' इति उपधादीर्घे प्राप्ते,

# ३५६. इन्हन्पूषार्यम्णां शौ (६.४.१२)

- पदद्वयम् । इन्-हन्-पूष-अर्यम्णाम्, शौ ।
- 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' (६.३.१११) इत्यतः 'दीर्घः' इति, 'नोपधायाः' (६.४.७) इत्यतः 'उपधायाः' इति च अनुवर्तते ।
- नियमसूत्रम् ।
- एषां शौ एव उपधायाः दीर्घः, नान्यत्र ।
- इति निषेधे प्राप्ते,

# ३५७. सौ च (६.४.१३)

- पदद्वयम् । सौ, च ।
- 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' (६.३.१११) इत्यतः 'दीर्घः' इति, 'नोपधायाः' (६.४.७) इत्यतः 'उपधायाः' इति, 'सर्वनामस्थाने चासम्बुद्धौ' इत्यतः 'असम्बुद्धौ' इति, 'इन्हन्पूषार्यम्णां शौ' इत्यतः 'इन्हन्पूषार्यम्णाम्' इति च अनुवर्तते ।
- इन्नादीनाम् उपधायाः दीर्घः स्याद् असम्बुद्धौ सौ परे ।

ꕥ वृत्रहन्  स्

ꕥ वृत्रहान् स् ('सौ च' इति उपधादीर्घः )

ꕥ वृत्रहान्        ('हल्ङ्याब्भ्यः...' - ६.१.६८ - इति सुलोपः)

ꕥ वृत्रहा        ('नलोपः प्रातिपदिकान्तस्य' - ८.२.७)

ꕥ हे वृत्रहन् ।

ও 'एकाजुत्तरपदे णः' (८.४.१२) इति णत्वम् [एकाज् उत्तरपदं यस्य तस्मिन् समासे पूर्वपदस्थात् निमित्तात् परस्य प्रातिपदिकान्त-नुम्-विभक्तिस्थस्य नस्य नित्यं णत्वं स्यात् ।]

ও वृत्रहणौ, वृत्रहणः ।

ও वृत्रहणम्, वृत्रहणौ ।

ও वृत्रहन् (शस्) अस्

ও वृत्रह् न् अस् ('अल्लोपोऽनः' इति अल्लोपः)

# ३५८. हो हन्तेर्ञ्णिन्नेषु (७.३.५४)

- पदत्रयम् । हः, हन्तेः, ञ्णिन्नेषु ।
- 'चजोः कु घिण्यतोः' (७.३.५२) इत्यतः 'कु' इति अनुवर्तते ।
- ञिति णिति च प्रत्यये नकारे च परे हन्तेः हकारस्य कुत्वं स्यात् ।
- आन्तरतम्यात् हस्य घः ।

- वृत्रह् न् अस्
- वृत्रघ् न् अस् ('हो हन्तेर्ञ्णिन्नेषु' इति कुत्वम्)
- वृत्रघ्नर्
- वृत्रघ्नः